श्रीआत्मानन्द–ग्रन्थरत्नमाला–सप्तमं रत्नम् ( ७ )

॥ श्रीमत्तपगच्छगगनगभस्तिमालिश्रीमद्देवेन्द्रसूरिपादप्रणीतः ॥

# ॥ श्रीसिद्धदण्डिकास्तवः ॥

( टिप्पणिकासमेतः )

॥सुरतनिवासि–श्रेष्ठि–प्रेमचन्द्रतनुज–चुनीलाल–पुत्री–नानीबाई–द्रव्यसाहाय्येन

प्रकाशयित्री–श्रीआत्मानन्दसभा–भावनगर ॥

इद पुस्तक मुम्बय्यां वल्लभदास–त्रिभुवनदास गांधी सेक्रेटरी आत्मानंद जैनसभा भावनगर इत्यनेन निर्णयसागरमुद्रणालये कोलभाटवीथ्यां
२३ तमे गृहे बा. रा. घाणेकरद्वारा मुद्रयित्वा प्रकाशितम् ।

वीरसंवत् २४३८. आत्मसंवत्–१६. विक्रमसंवत् १९६८.

## ॥ प्रस्तावना ॥

इह हि जगदद्भुतजैनशासनबद्धानुरागभव्याङ्गिगणमागमगुम्फितातिगम्भीरज्ञेयहेयोपादेयामेयपदार्थसार्थसारमवगमयितुकामैरुपकृतिकरणैककरुणारसनिमग्नमानसैः श्रीमद्बृहद्गच्छस्यैवाजीवितविहितातिदुष्कराचाम्लतपसा तपगच्छ इति नामान्तरमासादितवतां चित्रकूट (चित्तौड)महीमहेन्द्रोपलब्ध 'हीरेति' विरुदानां विश्वविख्यातविशदकीर्तिश्रीमज्जगचन्द्रसूरीन्द्राणां विनेयवर्गाग्रेसरः श्रीमद्देवेन्द्रसूरिभिरनेकानि प्रकरणादीनि सन्दृब्धानि वरीवृत्यन्ते, तेष्वन्यतममिदं सिद्धदण्डिकास्तवाभिधानं प्रकरणम्। इह च प्रकरणकारः श्रीनाभेयवंशजानां त्रिखण्डाधिपानां भूभृतां सिद्धिगतानां सर्वार्थगतानां च सम्यक्तया संख्योद्घाटनं स्पष्टतया प्रकटीकृतम् ।

एते सूरिशिरोमणयः कदा कतमं महीमण्डलं मण्डयामासुरिति पर्यालोचनायां प्रवृत्तायाम्—श्रीमन्मुनिसुन्दरसूरिपादप्रणीतगुर्वावलीविलोकनेन विक्रमीयसप्तविंशत्यधिकत्रयोदशशततमाब्देऽमीषां स्वर्गारोहणं निर्णीयते, अतस्तेषां कालमानं निर्विरोधं विक्रमीयत्रयोदशशताब्दीयं ज्ञायते । स्तवस्यास्य मूलपाठपुस्तकानि चत्वारि समासादितानि, सटिप्पणीकं चैकं विश्वविख्यातकीर्त्तिकौमुदीकश्रीमद्विजयानन्दसूरिशिष्यप्रवर्त्तकश्रीमत्कान्तिविजयमुनीनां सकाशत उपलब्धम्, एतत्पुस्तकचतुष्टयाधारेण संशोधितेऽप्यत्र निबन्धे यत्र क्वचनाशुद्धिः कृता जाता वा भवेत्तत्र संशोधनीयं धीधनैरित्यभ्यर्थयते—

सविनयबद्धाञ्जलिः प्रवर्त्तकश्रीमत्कान्तिविजयपादपद्मपरागः

**चतुरविजयो मुनिः**

**( सुरत )**



Printed by B. R. Ghanekar at the Nirnaya-sagar Press, 23, Kolbhat Lane, Bombay, and
Published by Vallabhadas Tribhuvandas Ghandhi, Secretary, Atmanand Jain Sabha, Bhavanagar.

॥ अर्हम् ॥

॥ श्रीविजयकमलसूरिपादपद्मेभ्यो नमः ॥

# ॥ श्रीसिद्धदण्डिकास्तवः ॥

जं उसहकेवलाओ, अंतमुहुत्तेण सिवगमो भणिओ। जा पुरिसजुगअसंखा, तत्थ इमा सिद्धदंडीओ ॥१॥
सत्तुंजयसिद्धा भरहवंसनिवई सुबुद्धिणा सिट्ठा। जह सगरसुआणऽट्ठावयंमि तह कित्तिअं थुणिमो ॥२॥
आइच्चजसाइ सिवे, चउदसलक्खा य एगु सव्वट्ठे। एवं जा इक्किक्का, असंख इगदुगतिगाईवि ॥ ३ ॥
जा पन्नासमसंखा, तो सव्वट्ठंमि लक्खचउदसगं। एगो सिवे तहेव य, अस्संखा जाव पन्नासं ॥ ४ ॥

आदित्ययशोनृपप्रभृतयो नाभेयवंशजास्त्रिखण्डाधिपाश्चतुर्दशलक्षा निरन्तरं सिद्धिमगमन्। तत एकः सर्वार्थसिद्धे। अत्र सर्वत्र सर्वार्थशब्देन पञ्चाप्यनुत्तरविमानानि लभ्यन्ते यतो विमानपञ्चकाधारस्य तत्प्रस्तटस्य सर्वार्थनाम्ना रूढिरिति। एवं चतुर्दश चतुर्दश लक्षान्तरितः सर्वार्थसिद्धे एकैकस्तावद्वक्तव्यो यावत्तेऽप्येकैका असंख्येया भवन्ति। ततो भूयश्चतुर्दश लक्षा नृपा निरन्तरं निर्वाणे, द्वौ सर्वार्थसिद्धे, एवं चतुर्दश चतुर्दश लक्षान्तरितौ द्वौ द्वौ सर्वार्थसिद्धे तावद्वाच्यौ

यावत्तेऽपि द्विकसंख्या असंख्येया भवन्ति । एवं त्रिकत्रिकसंख्यादयोऽपि प्रत्येकमसंख्येयास्तावद्वाच्याः सर्वार्थसिद्धे यावत्पञ्चाशत्पञ्चाशत् संख्याकाश्चतुर्दश चतुर्दश लक्षान्तरिता असंख्येया भवन्ति । अनुलोमसिद्धदण्डिकास्थापना ॥

| | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| सिद्धिगताः | १४ | १४ | १४ | १४ | १४ | १४ | १४ | १४ | १४ | १४ | १४ | असंख्येयवाराः |
| सर्वार्थगताः | १ | २ | ३ | ४ | ५ | ६ | ७ | ८ | ९ | १० | ५० | असंख्येयवाराः |

ततोऽनन्तरं चतुर्दशलक्षा नृपाः सर्वार्थसिद्धे एकः सिद्धो, एवं चतुर्दशलक्षान्तरित एकैकः सिद्धौ तावद्वक्तव्यो यावत्तेप्येकैका असंख्येया भवन्ति। ततो भूयोऽपि चतुर्दशलक्षा नृपाः सर्वार्थसिद्धे ततो द्वौ निर्वाणे, एवं चतुर्दश चतुर्दश लक्षान्तरितौ द्वौ द्वौ निर्वाणे तावद्वक्तव्यौ, यावत्तेऽपि द्विकद्विकसंख्या असंख्येया भवन्ति; एवं त्रिकत्रिकसंख्यादयोऽपि यावत्पञ्चाशत्पञ्चाशत्संख्याश्चतुर्दश चतुर्दश लक्षान्तरिताः सिद्धौ प्रत्येकमसंख्येया भवन्ति ॥३ ॥४॥ प्रतिलोमसिद्धदण्डिकास्थापना

| | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| सिद्धिगताः | १ | २ | ३ | ४ | ५ | ६ | ७ | ८ | ९ | १० | ५० | असंख्येयवाराः |
| सर्वार्थगताः | १४ | १४ | १४ | १४ | १४ | १४ | १४ | १४ | १४ | १४ | १४ | असंख्येयवाराः |

**तो दो लक्खा मुक्खे, दुलक्ख सव्वट्ठि मुक्खि लक्खतिगं। इयइगलक्खुत्तरिआ, जा लक्खअसंख दोसु समा५**

ततः परं द्वे लक्षे नृपाणां निर्वाणे, द्वे लक्षे सर्वार्थे । एवं त्रिचतुष्पञ्चषड्ड यावदुभयत्रापि असंख्येया असंख्येया लक्षा वक्तव्याः ॥ ५ ॥ समसंख्यसिद्धदण्डिकास्थापना ॥

| | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| सिद्धिगताः | २ | ३ | ४ | ५ | ६ | ७ | ८ | ९ | १० | ११ | १२ | एवं यावदसंख्येयलक्षाः |
| सर्वार्थगताः | २ | ३ | ४ | ५ | ६ | ७ | ८ | ९ | १० | ११ | १२ | एवं यावदसंख्येयलक्षाः |

**तो एगु सिवे सव्वट्ठि दुन्नि ति सिवम्मि चउर सव्वट्ठे । इय एगुत्तरवुड्ढी, जाव असंखा पुढो दोसु ॥ ६ ॥**

ततः परं चतस्रश्चित्रान्तरदण्डिकाः । तद्यथा—प्रथमा एकादिका एकोत्तरा, द्वितीया एकादिद्व्युत्तरा, तृतीया एकादित्र्युत्तरा, चतुर्थी त्र्यादिका द्व्यादिविषमोत्तरा । प्रथमा भाव्यते—प्रथममेकः सिद्धौ, ततो द्वौ सर्वार्थे, ततस्त्रयः सिद्धौ, ततश्चत्वारः सर्वार्थे, ततः पञ्च सिद्धौ, षट् सर्वार्थे । एवमेकोत्तरया वृद्ध्या शिवे सर्वार्थे च तावद्वक्तव्यं यावदुभयत्राप्यसंख्येया भवन्ति ॥ ६ ॥ एकोत्तरसिद्धदण्डिकास्थापना ॥

| | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| सिद्धिगताः | १ | ३ | ५ | ७ | ९ | ११ | १३ | १५ | १७ | १९ | २१ | एवं यावदसंख्याः |
| सर्वार्थगताः | २ | ४ | ६ | ८ | १० | १२ | १४ | १६ | १८ | २० | २२ | एवं यावदसंख्याः |

**इक्को मुक्खे सवट्ठि तिन्नि पण मुक्खि इअ दुरुत्तरिआ । जा दोसुऽवि अ असंखा, एमेव तिउत्तरासेढी ॥७॥**

द्वितीया भाव्यते यथा—ततः परमेकः सिद्धौ, त्रयः सर्वार्थे, ततः पञ्च सिद्धौ, सप्त सर्वार्थे । एवं द्व्युत्तरया वृद्ध्या शिवगतौ सर्वार्थे च तावद्वक्तव्यं यावदुभयत्राप्यसंख्येया भवन्ति ॥ द्व्युत्तरसिद्धदण्डिकास्थापना

| | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|
| सिद्धिगताः | १ | ५ | ९ | १३ | १७ | २१ | २५ | २९ | ३३ | ३७ | एवं यावदसंख्याः |
| सर्वार्थगताः | ३ | ७ | ११ | १५ | १९ | २३ | २७ | ३१ | ३५ | ३९ | एवं यावदसंख्याः |

तृतीया यथा—ततः परमेकः सिद्धौ, चत्वारः सर्वार्थे, ततः सप्त सिद्धौ, दश सर्वार्थे । एवं त्र्युत्तरया च वृद्ध्या शिवे सर्वार्थे च क्रमेण तावद्वाच्यं यावदुभयत्रासंख्येयाः स्युः ॥ ७ ॥ त्र्युत्तरा सिद्धदण्डिकास्थापना ॥

| | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|
| सिद्धिगताः | १ | ७ | १३ | १९ | २५ | ३१ | ३७ | ४३ | ४९ | ५५ | एवं यावदसंख्याः |
| सर्वार्थगताः | ४ | १० | १६ | २२ | २८ | ३४ | ४० | ४६ | ५२ | ५८ | एवं यावदसंख्याः |

चतुर्थी विचित्रा । तस्याः परिज्ञानार्थमयमुपायः—

विसमुत्तरसेढीए, हिट्ठुवरिं ठविअ अउणतीसतिआ। पढमे नत्थि क्खेवो, सेसेसु सया इमो खेवो ॥ ८ ॥

इहैकोनात्रिंशत्त्रिका ऊर्ध्वाधःपरिपाट्या पट्टिकादौ स्थाप्यन्ते । तत्र प्रथमे त्रिके न किंचित्प्रक्षिप्यते ( शेषेषु अवशिष्टासु दण्डिकासु सदाऽयं वक्ष्यमाणः क्षेपोऽवसेयः ) ॥ ८ ॥

दुग पण नवगं तेरस सतरस बावीस छच्च अट्ठेव। बारस चउदस तह अड–वीसा छव्वीस पणवीसा॥९॥
एगारस तेवीसा, सीयाला सयरि सत्तहत्तरिआ । इग दुग सत्तासीई, इगहत्तरिमेव बासट्ठी ॥ १० ॥
अउणत्तरि चउवीसा, छायाला तह सयं च छव्वीसा। मोलित्तु इगंतरिआ, सिद्धीए तह य सवट्ठे ॥ ११ ॥

द्वितीये द्विकः, तृतीये पञ्च, चतुर्थे नव, पञ्चमे त्रयोदश, षष्ठे सप्तदश, सप्तमे द्वाविंशतिः, अष्टमे षट्, नवमेऽष्टौ, दशमे द्वादश, एकादशे चतुर्दश, द्वादशेऽष्टाविंशतिः, त्रयोदशे षड्विंशतिः, चतुर्दशे पञ्चविंशतिः, पञ्चदशे एकादश, षोडशे त्रयोविंशतिः, सप्तदशे सप्तचत्वारिंशत्, अष्टादशे सप्ततिः, एकोनाविंशे सप्तसप्ततिः, विंशे एकः, एकविंशे द्वौ, द्वाविंशे सप्ताशीतिः, त्रयोविंशे एकसप्ततिः, चतुर्विंशे द्वाषष्टिः, पञ्चविंशे एकोनसप्ततिः, षड्विंशे चतुर्विंशतिः, सप्तविंशे षट्चत्वारिंशत्, अष्टाविंशे शतम्, एकोनत्रिंशे षाड्विंशतिः । एतेषु च राशिषु प्रक्षिप्तेषु यद्यद्भवति, तावन्तस्तावन्तः क्रमेण सिद्धौ सर्वार्थे चेत्येवंरूपेण ज्ञेयः। तद्यथा—त्र्यः सिद्धौ, पञ्च सर्वार्थे, ततः सिद्धावष्टौ, द्वादश सर्वार्थे, ततः षोडश सिद्धौ, विंशतिः सर्वार्थे, ततः पंशुविंशतिः सिद्धौ, नव सर्वार्थे, तत एकादश सिद्धौ, पञ्चदश सर्वार्थे, ततः सप्तदश सिद्धौ, एकत्रिंशत्सर्वार्थे, तत एकोनात्रिंशत् सिद्धौ, अष्टाविंशतिः सर्वार्थे, ततश्चतुर्दश सिद्धौ, षड्विंशतिः सर्वार्थे, ततः पञ्चाशत्सिद्धौ, त्रिसप्ततिः सर्वार्थे,

ततोऽशीतिः सिद्धौ, चत्वारः सर्वार्थे, ततः पञ्च सिद्धौ, नवतिः सर्वार्थे, ततश्चतुःसप्ततिः सिद्धौ, पञ्चषष्टिः सर्वार्थे, ततो द्वासप्ततिः सिद्धौ, सप्तविंशतिः सर्वार्थे, तत एकोनपञ्चाशत्सिद्धौ, त्र्यधिकशतं सर्वार्थे, तत एकोनत्रिंशत्सिद्धौ ॥ ९ ॥

१०॥११॥ विषमोत्तरसिद्धदण्डिकास्थापना यथा ॥

| | | | | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| सिद्धिगताः | ३ | ८ | १६ | २५ | ११ | १७ | २९ | १४ | ५० | ८० | ५ | ७४ | ७२ | ४९ | २९ | एवं यावदसंख्याः |
| सर्वार्थगताः | ५ | १२ | २० | ९ | १५ | ३१ | २८ | २६ | ७३ | ४ | ९० | ६५ | २७ | १०३ | ० | एवं यावदसंख्याः |

**अंतिल्लअंकआइं, ठविउं बीआइखेवगा तह य। एवमसंखा नेआ, जा अजिअपिआ समुप्पन्नो ॥ १२ ॥**

एवं द्व्यादिविषमोत्तराः सिद्धदण्डिका असंख्येयास्तावद्वाच्या यावदजितजिनपिता जितशत्रुरुत्पन्नः। नवरं पाश्चात्यायां दण्डिकायां यदन्त्यमङ्कस्थानं तदुत्तरस्यामुत्तरस्यामाद्यं ज्ञेयम्। तथाद्यायां दण्डिकायामादिममङ्कस्थानं सिद्धौ, द्वितीयस्यां सर्वार्थे, तृतीयस्यां सिद्धौ, चतुर्थ्यां सर्वार्थे। एवमसंख्येयास्वपि दण्डिकास्वाद्यान्यङ्कस्थानानि क्रमेण सिद्धौ सर्वार्थे च ज्ञेयानि। एतदेव दिङ्मात्रतो विभाव्यते—तत्राद्यायामन्त्यमङ्कस्थानं २९ ततः २९ वारानेकोनत्रिंशदूर्ध्वाधः क्रमेण स्थाप्यते, तत्राद्येऽङ्कस्थाने नास्ति प्रक्षेपः। द्वितीयादिषु चाङ्केषु "दुग पणग" इत्यादयः क्रमेण प्रक्षेपणीया राशयः प्रक्षिप्यन्ते, क्षिप्तेषु सत्सु यद्यत्क्रमेण भवति, तावन्तः क्रमेण सिद्धौ सर्वार्थे चेत्येवं ज्ञेयाः। तद्यथा—सर्वार्थसिद्धा २९ सिद्धौ ३१ ततः सर्वार्थसिद्धौ ३४ सिद्धौ ३८ सर्वार्थे ४२ सिद्धौ ४६ सर्वार्थे ५१ सिद्धौ ३५ सर्वार्थे ३७ सिद्धौ ४१ सर्वार्थे ४३ सिद्धौ ५७ सर्वार्थे ५५ सिद्धौ ५४ सर्वार्थे ४० सिद्धौ ५२ सर्वार्थे ७६ सिद्धौ ९९ सर्वार्थे १०६ सिद्धौ ३० सर्वार्थे ३१ सिद्धौ ११६ सर्वार्थे १०० सिद्धौ ९१ सर्वार्थे ९८ सिद्धौ ५३ सर्वार्थे ७५ सिद्धौ १२९ सर्वार्थे ५५ ॥ द्विती-

सिद्धदण्डिकास्तवः ॥ ४ ॥

यविषमोत्तरसिद्धदण्डिकास्थापना[1] ॥

| | | | | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| सर्वार्थगताः | २९ | ३४ | ४२ | ५१ | ३७ | ४३ | ५५ | ४० | ७६ | १०६ | ३१ | १०० | ९८ | ७५ | ५५ | एवं यावदसंख्याः |
| सिद्धिगताः | ३१ | ३८ | ४६ | ३५ | ४१ | ५७ | ५४ | ५२ | ९९ | ३० | ११६ | ९१ | ५३ | १२९ | ० | एवं यावदसंख्याः |

अस्यामन्त्यमङ्कस्थानं ५५ ततस्तृतीयस्यामिदमेवाद्यमङ्कस्थानम् । ततः ५५ एकोनत्रिंशद्वारान् स्थाप्यते, ततः प्रथममङ्कस्थाने नास्ति क्षेपो द्वितीयादिषु च पूर्वोक्ता राशयः क्षिप्यन्ते । इह चाद्यमङ्कस्थानं सिद्धौ ततस्तेषु प्रक्षिप्तेषु सत्सु यत्क्रमेण स्यात्, तावन्तस्तावन्तः प्रथमादङ्कस्थापनादारभ्य सिद्धौ सर्वार्थे इत्येवं क्रमेण वेदितव्याः । एवमन्यास्वपि दण्डिकासुभावनीयम् ॥१२॥

**अस्संखकोडिलक्खा, सिद्धा सव्वट्ठगा य तह सिद्धा । एगभवेणं देविंदवंदिआ दिंतु सिद्धिसुहं ॥ १३ ॥**

**॥ इति श्रीदेवेन्द्रसूरिपादप्रणीतः श्रीसिद्धदण्डिकास्तवः समाप्तः ॥**

(असंख्यकोटिलक्षाः सिद्धाः सर्वार्थगाश्च तथा सिद्धाः । एकभवेन देवेन्द्रवन्दिता ददतु सिद्धिसुखम् ॥ १३ ॥ ) ( संग्रहगाथाः ) चउदसलक्खा सिद्धा, निवईणिक्को अ होइ सव्वट्ठे । इक्किक्कट्ठाणे पुण, पुरिसजुगा हुंतऽसंखिज्जा ॥ १ ॥ पुणरवि चउदसलक्खा, सिद्धा निवईण दोऽवि सव्वट्ठे । दुगठाणेऽवि असंखा, पुरिसजुगा हुंति नायव्वा ॥ २ ॥ जाव य लक्खा चउदस, सिद्धा पन्नास हुंति सव्वट्ठे । पन्नासट्ठाणेऽविहु, पुरिसजुगा हुंतऽसंखिज्जा ॥ ३ ॥ दो लक्खा सिद्धीए, दो लक्खा नरवईण सव्वट्ठे एवं तिलक्खचउपंच जावलक्खा असंखिज्जा ॥ ४ ॥ इति सिद्धदण्डिकास्तवस्य संक्षिप्तटिप्पणी समाप्ता ॥

---

१ अस्यां स्थापनायां बहुषु सयन्त्रमूलपुस्तकेषु सिद्धिगतानामुपरिलेखः सर्वार्थगतानां चाधोलेख उपलभ्यते, परं सटिप्पणीकपुस्तकयन्त्रे तद्व्यत्ययदर्शनात, टिप्पणिकायां पुनः सर्वार्थसिद्धौ २९ इत्यादिक्रमेण लिखितत्वादन्यसटिप्पणपुस्तकस्यानुपलम्भाच्च तथैवोपन्यस्तम् ।